# चौधरीचरणसिंहविश्वविद्यालयः मेरठम् (उ0प्र0) भारतम्

## राष्ट्रियव्याससमारोहः 2023



कार्तिके यमद्वितीयातोऽष्टमीं यावत् 2080 (15 नवम्बरतः 21 नवम्बरं यावत् 2023)

सम्मान्याः कुलपतयः / अध्यक्षाः संस्कृतविभागस्य / प्राचार्याः / महोदयाः

विदितं भवतु यद्यथापूर्वमत्र प्रचरिष्यति उपरिलिखितासु तिथिषु व्याससमारोहः । निवेद्यते यद् भवन्तः प्रतिवर्षमिव स्वयं स्वदलेन शोधपत्रेण स्वकथया कविताभिर्वा सहागत्य अस्मान् कृतार्थयन्तु प्रतिनिधिं वा प्रेषयन्तु ।

अत्र व्याससमारोहे कार्यक्रमः संस्कृतविभागे –

| | | | |
|---|---|---|---|
| 15.11.2023 | 03:00 | वादनवेलातः | उद्घाटनोत्सवः शास्त्रीयसङ्गीतञ्च (कलाकारः डॉ0 दीप्तिबंसलमहाभागा) |
| 16.11.2023 | 10:00 | वादनवेलातः | अन्तर्महाविद्यालयीया संस्कृतवादविवादप्रतियोगिता |
| | 02:00 | वादनवेलातः | शोधसङ्गोष्ठी |
| | 04:00 | वादनवेलातः | कथा / सांस्कृतिककार्यक्रमाः |
| | 05:30 | वादनवेलातः | संस्कृतकविसमवायः |
| 17.11.2023 | 10:00 | वादनवेलातः | अन्तर्विद्यालयीया संस्कृतवादविवादप्रतियोगिता |
| | 02:00 | वादनवेलातः | शोधसङ्गोष्ठी |
| | 04:00 | वादनवेलातः | यौगिकबलप्रदर्शनम् |
| | 05:30 | वादनवेलातः | संस्कृतकविसमवायः |
| 18.11.2023 | 10:00 | वादनवेलातः | कालीचरणपौराणिकस्मृतिव्याख्यानम् |
| | 02:00 | वादनवेलातः | शोधसङ्गोष्ठी |
| | 04:00 | वादनवेलातः | कथा / सांस्कृतिककार्यक्रमाः |
| | 05:30 | वादनवेलातः | संस्कृतकविसमवायः |
| 19.11.2023 | 10:00 | वादनवेलातः | अन्तर्विश्वविद्यालयीया संस्कृतवादविवादप्रतियोगिता |
| | 02:00 | वादनवेलातः | शोधसङ्गोष्ठी |
| | 04:00 | वादनवेलातः | कथा / सांस्कृतिककार्यक्रमाः |
| | 05:30 | वादनवेलातः | संस्कृतकविसमवायः |
| 20-11-2023 | 08:00 | वादनवेलातः | यात्रा विदुर कुटी, बिजनौर |
| 21-11-2023 | 10:00 | वादनवेलातः | समापनोत्सवः (पुरस्कारादिवितरणम्) |

अत्रभवन्तः सादरमाहूयन्ते । तत्र नियमाः

1. वादविवादप्रतियोगितायाः विषयः–''प्रारब्धं किल भोक्तव्यं शुभं वाप्यथ वाशुभम्। उद्यमस्तद्वशे नित्यं कारयत्येव सर्वथा'' ।।
   श्रीमद्देवीभागवतपुराणे–1.17.28
   प्रतिसंस्थं पक्षं विपक्षं चाश्रित्य द्वौ छात्रौ प्रवेशार्हौ । प्रतिप्रतियोगिसप्तमिनटात्मकः कालावधिः । विजेतृभ्यः प्रथमद्वितीयतृतीयपुरस्काराः पदकादिरूपाः अथ च श्रेष्ठसंस्थाकृते चलवैजयन्ती अस्ति। धर्मेन्द्रमणिनाम्ना पुरस्कारौ अपि दीयमानौ स्तः ।
2. शोधसङ्गोष्ठी –सम्पादकमण्डलस्य स्वीकृतिं विना किमपि शोधपत्रं प्रस्तोतुं न शक्यते । ऐषमः श्रीमद्देवीभागवतपुराणमाश्रित्य सङ्गोष्ठ्यः चरिष्यन्ति ।
3. कविसमवायः –प्रतिदिनं सन्ध्याकाले भविष्यति। तत्र निर्बाधकविताप्रवाहो भविष्यति। श्रेष्ठकविः चलव्यासवैजयन्त्या सम्मानितो भविष्यति। चलव्यासवैजयन्त्या व्यासध्वजेन सह एकसहस्ररूप्यकाण्यपि सन्ति ।
4. सर्वेषु कार्यक्रमेषु –भागग्रहणसूचनाकृते अन्तिमा तिथि 07.11.2023
5. भोजनावासव्यवस्था –विद्यते । मार्गादिव्ययस्य व्यवस्था स्वस्वसंस्थातः स्वयं वा करणीया । स्वीकृते शोधपत्रे द्वितीयश्रेणीकमार्गव्ययस्यापि व्यवस्था भवितुं शक्नोति । अतः पूर्वमेव सूचनादिकं प्रेषणीयम् ।

मेरठनगरं हि भारतवर्षे उत्तरप्रदेशे दिल्लीनगरतः प्रायः 70 किलोमीटरदूरं रेलबसमार्गाभ्यां सुसंबद्धं मध्येगंगायमुनं प्रसिद्धमैतिहासिकं नगरम् । आगमनादिसूचनायां पूर्वप्राप्तायां मोदावहो निवासोऽत्रभवतां भवितेत्याशासे । एतादृशाः कार्यक्रमाः भवादृशां विदुषां सहयोगेनैव सफला भवन्तीति । निवेद्यते यद् भवन्त इन्द्रप्रस्थहस्तिनापुरयोरन्तराले व्यासक्रीडाभूमिपरिसरे मेरठनगरेऽवश्यमेवागच्छन्तु। अथ च स्वस्वविश्वविद्यालयेभ्यो महाविद्यालयेभ्यो वा प्रतियोगिच्छात्रदलं सांस्कृतिकदलमध्यापकं वा प्रतिनिधिरूपेण प्रेषयन्तु स्वयं च / वा आगत्य कृतार्थयन्तु । इति।

संपर्कस्थानम् – त्रिपाठी डॉ0 सुधाकराचार्यः (सम्मानिताचार्यः पूर्वविभागाध्यक्षश्च)
लखनपाल डॉ0 पूनम (पूर्वसंयोजयित्री)
मिश्रः डॉ. वाचस्पतिः (समन्वयकः, संस्कृतप्राच्यभाषाविभागः)
डॉ0 संतोषकुमारी – 8439720212, 9359510111
डॉ0 नरेन्द्रकुमारः – 9319780777
Email: vyasasamarohah@gmail.com | sanskritvibhagccsu@gmail.com

भवता

संयोजयित्री / सयोजकः



Sh. Sachdeva
31/10/23

समस्त आचार्यों सूचना वेबसाइट पर अपलोड करवा दी जा रही है एवं विश्वविद्यालय अध्यापकों एवं छात्रों के व्हाट्सएप ग्रुप पर भी डाला जा रहा ...
31/10/2023